This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

शिर्षक	ग्रंथकार	विषय	विस्तार (पुर्ण/ अपूर्ण)	टिकाकार	आकार	पृष्ठे	लिपी	सामग्री	Lines per page	Letters per line	Condition & age (शके/विक्रम सवंत)	Additional Particulars / Remark
नीलकंठचार्योपाध्याय	निलकंठ	पुराण	पूर्ण	-	८/12	~~४८~~ 21	संस्कृत	कागद	10	63		

M- 2916

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥अथनीलकंठीप्रथमतंत्रा॥नुक्रमणिकाप्रारंभः॥

१ अथमंगलाचरणं॥
द्वादशराशिस्वरूपं॥
१ अथमेषस्वरूपं
२ वृषभमिथुनरूपे
३ कर्कसिंहकन्यतुलानां
४ वृश्चिकधनमकरकुंभानां
५ मीनरूपंराशीनांमित्रा
मित्रविभागफलार्थंसं
क्षेपेणराशिस्वरूपंचा
६ वर्षप्रवृत्तिसमयः॥
६ तिथिसाधनंवर्षस्य
७ वर्षप्रवेशस्युदाहरणं
८ पंचांगस्पष्टग्रहचालनं
८ नक्षत्रानयनं

९ नतोन्नतभावसंधिसाधनं
१० जन्मभमायुर्दयचक्रं
११ लग्नोदयचक्रंतन्यादिद्वा
११ दशभावाःससंधयः॥
१२ राशीशाद्रेष्काणेशाः द्रेष्का
१२ णचक्रंग्रहाणांतुंगनीचं
१२ उच्चबलानयनंनवांशेशाः
१२ मेषादिराशिविभागयुक्ता
१३ होरेशाः पंचवर्गीबलं
१४ द्वादशवर्गीचक्रं
१५ द्रेष्काणेशाःषडाद्येकादशां
१५ शेशानयनं
१६ पंचवर्गीचक्रंद्वादशांशचक्रं
१६ पंचद्वादशवर्ग्युदाहरणं

१६ द्वादशवर्गीचक्रं॥द्वादशा
१७ वर्गीयशुभपापग्रहवर्गफलं
१८ लग्नाद्यष्टमभावांतफलं
१९ नवमादिद्वादशांतंफलं
केंद्रचतुष्टयस्थानानि
सर्वसाधारणग्रहबलिष्ठ
स्थानानि॥चंद्रभौमयोः
१९ विशेषेणबलिष्ठस्थानानि
सर्वग्रहाणांनवशस्ताः॥
षष्ठाष्टरिपवोनिष्फलाः द्वाद
१९ शांत्यातिक्रमेस्मोपिशुभाः
२० क्रेराशिपाः क्रेराशिद्रेष्का
णनामयोजने॥सप्तांश
२० ग्रहरूपं समाप्त॥६॥

२० यवर्षेशनिर्णयः॥मुंथा
२१ राशेःमुंथामुथलक्षणं
इत्थसालशापकर्णसु
अथग्रहाणांस्वरूपं॥
२२ सूर्यादिग्रहाणांतंस्वरूपं
२३ गुर्वादिराहुकेतुस्वरूपं
२४ स्थानदृष्टिगणितगतदृष्टी
२५ सूर्यादिदीप्तांशाः दृष्टी
२६ दृष्टिफलंषोडशयोगारंभः
२७ इक्कवालईदुवारइत्थशा
२८ लयोगविधिःसंवमुथशिल
२९ अशुभफलंतृतीयमुथ
२९ शिलंईसराफःमूसरि
फः

२९ नक्तयोगसोदाहरणं
३० यमयायोगसोदाहरणं
३१ मणऊयोगसभेदसोदाहरणं
३२ कंबूलंअनेकविधं
३३ उत्तममध्यमंकेवलं
३४ उत्तमाधमं
३४ मध्यममध्यमं
३५ मध्यमाधमंउत्तमं
३६ अधमंअधमोत्तमं
३६ अधममध्यमंमध्यमः
३६ अधमाधमंसोदाहरणं
३८ तंबीरहरसंयोगोदाहरणं
३९ कूकारा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥ इति नीलकंठीलिखितं श्लोकाः ॥ अथ सहमतंत्रानुक्रमणिका ॥
॥ ९ ॥ ९ ॥ ९ ॥ ९ ॥ ९ ॥

४०	गैरिकबूलोदाहरणं
४०	स्वक्षासरः रहुम
४१	दुष्कालिकुथौ
४१	दुसोथदद्वीरो लंवारं
४२	कुथ अन्यप्रकारेण च
४३	दुरःफः अन्ये अशुभप्रकाराः
४३	असमतु दुरफाः अंत्रस्य
४३	चंद्रस्य दोषाल्पुतायोग
४४	विशेषेण इति योगाः
४४	सर्वान गणो हर्षस्थानानि
४५	च योरिसो दाहरणानि
४५	अथ सहमानयनमाह
४६	पंचाशत्सहमानि

	पुण्यसहमानयनं
४६	गरुविद्यायशःसहमानि
४६	मित्रमाहात्म्यआशासहमा
४६	सामर्थ्य भ्रातृगौरवराजतात
४८	मातृपुत्रजीवितअंबुसहम
४८	कर्मरोगमन्मथ सहम
४८	कलिक्षमाशास्त्रसहम
४९	बंधुबंधकदेशांतरमृत्युअर्थ
४९	परदारअन्यकर्मवणिजका
४९	र्यसिद्धिविवाह
५०	प्रसवसंतापश्रद्धाप्रीतिब
५०	लदेह जाड्यव्यापारपानी
५०	यपतन
५१	श्रमुशौर्यउपायसुहृद्गुरु
५१	रत्नाजलपथबंधन

५१	कन्या अश्व सहमचक्रं ५२
५२	अन्यप्रकारेणसहमानयनं
५३	सहमस्वामीसबलनिर्बलत्वं
५४	अन्यसहमासंभवमाह
	जन्मनिबलिष्टसहमस्पष्टा
५४	थनेन बलस्थानराकरणं
	इति सहमसाधनं ॥
५४	अथ सहमफलानि ॥
	पुण्यसहमस्यफलं
५४	अस्य अशुभफल
५४	पापशुभसंबंधेन गत स
५४	हमयुति दृष्ट्योः फलं
५५	पुण्यसहमग्रासातस्य
५५	जन्मलग्नि अनिष्टस्थान
	गतस्य फलं

	कार्यसिद्धिसहमस्य शु
५५	भाशुभफलं
५५	कलिसहमस्य शुभाशु
५६	भफलं
	अथ विवाहप्रसवआ
५६	शासहमानां शुभाशुभं
५७	रोगअर्थशत्रुमित्र दृष्ट्या
५७	पुत्रसहमस्य च फलं
५८	सुतत्पत्नबधनगौरवा
५८	नांफल
५९	गौरव कर्मसंदिग्धार्थी
५९	नांसहमानामर्थंच
६०	माहात्म्यसामर्थ्यशौर्या
६०	णामर्थमाह

६०	अ[illegible]
६०	केनन्यायेन[illegible]
६०	इति सहमविचारः ॥
६०	अथ वर्षदशाक्रमः ॥
६१	पात्यांशसाधनं द्विवार
६१	अंशसाम्ये निर्णयं च
६१	सौरसावनमानेनहो
६२	संचक्र उभयमानेन
	अंतर्दशामासप्रवेश
६२	स्नानयनं
	पचांगान्मासप्रवेश
६३	नयनं बप्रकारेण सो
६४	अहूपानयन सोदाह
६५	पितामहपितृवर्णनं
६६	स्ववर्णनपूर्वकं समा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नीलकंठ्यां तृतीयतंत्रानुक्रमणिका ।।

१ प्रश्नविचारस्य प्रयोजनं
१ प्रष्टा कुटिलः सरलो वेत्यावं
२ बहवः प्रश्नाः युगपत्संभवंति तत्स्थानं
२ युगपदनेकप्रश्ननिषेधः
२ दृष्टादि विचारः ।। अथ प्रश्नजातं
२ तनस्थरूपं ।। कस्माल्लग्नाद्विचार्यं
२ लग्नादि द्वादशस्थानकार्यविचारः सामान्य
३ अथ प्रत्येकं भावप्रश्ननिरूपणं ।।
४ अथ मातादि पंचमस्थानांतपृच्छा
५ षष्ठस्थानपृच्छा ।। न्यापरिक्षा
६ सप्तमस्थानपृच्छा स्त्रीलाभस्त्रीस्नेहकु
७ अथ पातिव्रत्यपरिक्षा अष्टमस्थानपृ
८ नवमस्थानपृच्छा दशमपृच्छा
९ अथ एकादशद्वादशस्थानपृच्छा
९ अथ केचिद्विशेषतः प्रश्नाः
अथ परचक्रागमनपृच्छा
अथ दूरस्थो जीवति मृतो वेति प्रश्नः
अथ रोगिणः शुभाशुभज्ञानं ।।

११ अथ देवदोषज्ञानं
१२ स्वामिभक्तप्रश्नः
१२ अन्यदीयं श्रीर्मम भवि
११ ष्यति न वेति प्रश्नः
१२ नष्टद्रव्यलाभः
१३ चौरादिज्ञानं
१४ अथ विचोलतः संता
न प्रश्नः
१५ अथ भोजनप्रश्नः
१५ अथ स्वप्नप्रश्नः
१६ अथ उपास्यपृच्छी:
१६ कलहप्रश्नः
१६ बद्धमोक्षप्रश्नः
१६ अथ नौकाप्रश्नः
१७ अथ क्रयविक्रयी
१७ सस्यनिष्पत्तिः
१७ अथ प्रकीर्णका
ध्यायः
१८ अथ लाभादाका
लावधिनिर्णयः

१८ अथ सामान्यतो भाव
विचारः
कस्य भावस्य संबंधे
१८ नायं भवति जिज्ञासा
कस्यचिन्मयाभुंजेति
१९ सुरतप्रश्नः
१९ महर्घचिंता
अथ मनुष्याणां ज
न्मलग्नाप्रतीच
षेशुभाशुभज्ञानं
१९ अथ ताजिकशास्त्रा
नुसारेण प्रश्नोप
योगिनो इत्थशा
लादयो योगाः कैश्चि
२० मयानिरूप्यते
२० उदाहरणानि
इति तृतीयतंत्रा
नुक्रमणिका समाप्ता

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

…नालिकेटयाः अथ मंतत्रं ॥
नगालाचरणं द्वादशराशिरूपं १५
मेषरूपं
१ वृषमिथुनरूपे
२ कर्कसिंहकन्यातुलानांरूपं
४ वृश्चिकधनमकरकुंभानांरूपं
५ मीनरूपंराशीनांमित्रामित्रविभा
गफलार्थसंक्षेपेणराशिरूपंग्राह
६ वर्षसाधनार्थवर्षप्रवृत्तिसमयः
६ तिथिसाधनं   ८ नयनंच.
८ पंचांगस्थग्रहचालनंनक्षत्राश्चंद्रा
९ नतोन्नतसाधनं भावसंधिसाधनं
१० जन्मभूमावुदयचक्रं ८ भ्ययः
११ लंकोदयचक्रं तन्वादिद्वादशभावसं
१२ राशीशा द्रेष्काणेशाः द्रेष्काणचक्रं च
१२ ग्रहाणामुच्चनीचराशौ तद्भागांश्चाह
१२ उच्चबलानयनं नवांशस्वामिनः अ
१३ अथमेषादिराशित्रिभागमुक्ताह द्रेशाः
१३ पंचवर्गीबलं
१४ द्वादशवर्गीचक्रं

१५ अथ द्रेष्काणेशाः ॥
षडाचेकादशांशे
शानयनं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥अथनीलकण्ठ्यांत्रितीयोध्यायप्रारंः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नी॰कं॰ श्रीगणेशायनमः॥ ॥अथप्रश्नप्रकरणंनिरूप्यते॥ अथप्रश्नविचारस्यप्रयोजनमाह॥ वराहः॥ दैवज्ञस्यहि दैवेनसदसत्फलवांछया॥ नं॰२
॥१॥ अवश्यंगोचरेमर्त्यःसर्वःसमुपनीयते॥१॥ अश्रौषीच्चपुराविस्मोज्ञानार्थेसमुपस्थितः॥ वचनंलोकनाथोपिब्रह्माप्रश्नादिनिर्णयम्॥२॥
आदिशब्देनस्वरशकुनादिकम्॥ तस्मान्नृपःकुसुमरत्नफलाग्रहस्तःप्रातःप्रणम्यवरयेद्धरिशास्त्रसुखस्थः॥ होरांगशास्त्रकुशलाहितत
कारिणश्चसंहत्यदैवगणकान्सकृदेवपृच्छेत्॥३॥ उत्पलः॥ दृष्ट्वाभेदंग्रहगणितंजातकमवलोक्यनिरवशेषमपि॥ यःकथयतिशुभा
मशुभंतस्यनमिथ्याभवेद्वाणी॥४॥ एतच्चप्रश्ननिरूपणम्॥ विनीतेभ्योदीयमानंसत्फलंनान्येभ्यइत्युक्तंसमरसारे॥ विनयावनता
यदीयमानाप्रभवेत्कल्पलतेवसत्फलायेति॥५॥ श्रुतिरपि॥ विद्याहवैब्राह्मणमाजगामगोपायमाशेवधिष्टेऽहमस्मि॥ असूय
कायानृजवेऽयतायनमांब्रूयाद्वीर्यवतीतथास्यामिति॥ शेवधिर्निधिः॥ दीयमानमित्यनेनउपदेशाःशिष्येभ्योपृष्टेभ्योनिरूपण
मुभयमप्युच्यते॥ अतएवश्रुतौनमांब्रूयादितिसामान्येनोक्तम्॥ वचिरत्रप्रतिपादनक्रिया॥ तत्रप्रष्टाकुटिलःसरलोवेतिज्ञानंप्र
श्नतंत्रे॥ ऋजुरयमनृजुर्वायंप्रष्टापूर्वंपरीक्ष्यलग्नबलात्॥ गणकेनपश्चाद्वाच्यंदैवंतच्चित्तगंस्फुरति॥६॥ लग्नस्थेशशिनिशनौकेंद्र
स्थेज्ञेदिनेशरश्मिगते॥ भौमज्ञयोस्समदृशालग्नगचंद्रेऽनृजुःप्रष्टा॥७॥ लग्नेशुभग्रहयुतेसरलःक्रूरान्वितेभवेत्कुटिलः॥ लग्नेस्सौम्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दृक्त्वा विधुगुरुदर्श्यं च सरलोयं॥ ३॥ यदि गुरुबुधयोरेकः पश्यत स्वाधिपत्नौ रिपुदृक्षा॥ तत्कुटिलः प्रष्टा खल्वनयोरेकस्य यो साधुः
४॥ दशाभेदादीप्तादयस्तांश्च समेनंतरमेव वक्ष्यामः॥ अपरे तु मध्यमदेशांतरचरांतरोदयांतरभुजफलस्फुटीकरणवक्रमार्गोदय
स्तभेदेन दशाभेदत्वमाहुः॥ यदा चरांतरदेशांतरमध्यगतमेवेति मतं तदा जीवसंस्कारवशेन दशाभेदतोह्याः॥ अथ यत्र वहवः प्रश्नायु
गपत्संभवंति तत्र निरूपणप्रकारश्च खंडेश्वरप्रश्नविद्यायाम्॥ आदिमं लग्नतो ज्ञानं चंद्रस्थानाद्द्वितीयकम्॥ सूर्यस्थानात्तृती
यं स्यात्तुर्यं जीवगृहाद्भवेत्॥ बुधभृग्वोर्बलीयः स्यात्तद्गृहात्पंचमं पुनरित्यादिरुक्तः स तु न युक्तः सकृदेव पृच्छेदिति वराहवाक्य
स्वरसात्॥ नानाकर्तृकानेकप्रश्नस्यापि गणकस्यानेकनिरूपणनिषेधात्॥ तदुक्तं ज्ञानमुक्तावल्याम्॥ सम्यग्विचार्य लग्नं ब्रू
य स्त्वेकं ब्रूतेसौ गणी मिथ्या न भवेत्त स्यात्
यात्तस्य प्रश्नमेकदा यथाशास्त्रं॥ योगैकं वृतेसौनस्य न मिथ्या भवेद्वाणी॥ अत एव चिन्तामणौ॥ राशिं च कृत्वा समभ्यर्च्य फलैः पुष्पैः सरत्न
कैः॥ प्रष्टा शुभभूमौ दैवज्ञानेकं पृच्छेत्प्रयोजनम्॥ दशाभेदं ग्रहाणां च गणितं भावजं तथा॥ विमृश्यैकं च कथयेन्नानेकं प्राह पद्मभूरि
ति॥ दीप्ताद्यं दशाभेदं च ग्रहाणां भावजं फलम्॥ विचार्य प्रवदेद्यस्तु तस्योक्तं नान्यथा भवेत्॥ दीप्तो दीनोऽथ मुदितः स्वस्थः सुप्तो
निपीडितः॥ मुषितः परिहीनश्च सुवीर्यश्चाधिवीर्यकः॥ स्वोच्चे दीप्तः समाख्यातो नीचे दीनः प्रकीर्तितः॥ मुदितो मित्रगेहस्थः स्वस्थश्च

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नी॰ कं॰ ॥ २ ॥

स्वगृहे स्थितः॥ शत्रुगेहस्थितः सन्नो जितोऽन्यैर्न निपीडितः॥ नीचाभिमुखगो हीनो मुषितोऽस्तंगतो ग्रहः॥ सुवीर्यः कथितः प्राज्ञैः स्वोम
च्चाभिमुखसंस्थितः॥ अधिवीर्यो निगदितः सुरद्भिः शुभवर्गगः॥ दीप्ते सिद्धिश्च कार्याणां दीने दुःखसमागमः॥ स्वस्थे कीर्तिस्त
था लक्ष्मीरानन्दो मुदिते महत्॥ सुप्ते रिपुभयं दुःखं धनहानिर्निपीडिते॥ सुपीते परिहीने च कार्यनाशोऽर्थसंक्षयः॥ गजाश्वकनका
वाप्तिः सुवीर्ये रत्नसंपदः॥ अधिवीर्ये राज्यलब्धिः ग्रहे मित्रार्थसंगमः॥ अथ ग्रहस्वरूपम्॥ पूर्वः सत्वं नृपस्ताम्रः क्षत्रं ग्रीष्मो नृपश्च
लः॥ मधुदृक् पैत्तिको धातुः शूरः स्थूलः समकचौ रविः॥ कफो वर्षा मृदुर्गौरः तापयोगे रश्च सात्विकः॥ जीवो वैश्यश्च रोवृत्तो मारुतात्मा विधुः
सुदृक्॥ ग्रीष्मः क्षत्रतमो रक्तो याम्यः सेनागरो गरः॥ युवा धातुश्च पिंगाक्षः क्रूरः पित्तं शिखी कुजः॥ शारदी त्र्यो हरिद्दीर्घः षंढो मूलं कु
मारकः॥ लिपिज्ञ उत्तरे रजाश्च शूद्रः सौम्यस्त्रिधातुकः॥ सत्वं पित्तो हिमः श्लेष्मः दीर्घो मंत्री द्विजो नरः॥ मध्ये शानी कफो जीव मधुपिंग
लदृक् तथा॥ शुक्रः शांतो द्विजो नारी वैडूर्यो मंत्री रजः सितः॥ अग्नाग्नेयी कफः पाणिकुटिलासितमूर्द्धजः॥ कृष्णस्तमः कृशो वृद्धः षंढो
मूलां सजो लसः॥ शिशिरे पवनः क्रूरः पश्चिमो वातुलो शनिः॥ राहुर्धातुः शिखी मूलं शेषमन्यच्च मंदवत्॥ चिंतनीयं विलग्ने ज्ञातुं के
न्द्रगाद्वा बलाधिकात्॥ अथ प्रश्नजातं कस्माल्लग्नादिभावाद्विचारणीयमित्याह॥ सौख्यमायुर्वयो जातिरारोग्यं लक्षणं गुणं॥ क्लेशाक

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तोरूपवर्णास्तनोश्विंसंविचक्षणैः॥ मुक्ताफलंचमाणिक्यंरत्नधातुधनांबरं॥ हयकार्य्याध्वविज्ञानंवित्तस्थानाद्विलोकयेत्॥ भुवन
दीपके॥ भगिनीभ्रातृभृत्यानांदासकर्म्मकृतामपि॥ कुर्वीतवीक्षणंविद्वान्सम्यक्दुश्चिक्यवेश्मतः॥ वाटिकाखलकक्षेत्रमहौषधिनि
धीनपि॥ विवरादिप्रवेशंचपरस्त्यानालनोवुधः॥ गर्भोपत्यविनेयानांमंत्रसंधानयोरपि॥ विद्यावुद्धिप्रवंधानांसुतस्थानेविनिर्ण
यः॥ सौरभीरिपुसंग्रामगावोष्ट्रक्रूरकर्म्मणाम्॥ मातुलातंकभृत्यानांरिपुस्थानाद्विनिर्णयः॥ वाणिज्यंव्यवहारंचविवादंचसमंपरैः
॥ गमागमकलत्राणिपश्येत्सास्तः कलत्रतः॥ नद्युत्तारध्ववैषम्येदुर्गेशात्रवसंकटे॥ नष्टेदुष्टेरणेव्याधौच्छिद्रंछिद्रंनिरीक्षयेत्॥ वापीकू
पतडागादिप्रपादेवगृहाणिच॥ दीक्षांयात्रांमठंधर्म्मंधर्मान्निश्चित्सकीर्त्तयेत्॥ राज्यंमुद्रांपरंपुण्यंस्थानंतातप्रयोजनम्॥ वृष्टादि
व्योमवृत्तांतंव्योमस्थानान्निरीक्षयेत्॥ गजाश्वयानवस्त्राणिसस्यकांचनकन्यकाः॥ विद्वान्विद्यार्थयोर्लाभंलक्षयेल्लाभलग्नतः॥
त्यागभोगविवादेषुदानेष्टकृषिकर्म्मसु॥ व्ययस्थानेषुसर्वेषुविद्धिविद्वन्व्ययंव्ययात्॥ षट्पंचाशिकायाम्॥ योयोभावःस्वामिदृष्टो
युतोवासौम्यैर्वास्यात्तस्यतस्यास्तिवृद्धिः॥ पापैरेवंतस्यभावस्यहानिर्निर्देष्टव्याप्रश्नतोजन्मतोवा॥१॥ सौम्येविलग्नेयदिवास्ववर्गे
शीर्षोदयेसिद्धिमुपैतिकार्यम्॥ अतोविपर्य्यस्तमसिद्धिहेतुःकृच्छ्रेणसंसिद्धिकरंविमिश्रम्॥ भुवनप्रदीपे॥ लग्नपतिर्यदिलग्नंकार्याधिप

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नी॰कं॰ श्चवीक्ष्यंतेकार्य्यम्॥लग्नाधीशः कार्य्यंकार्य्येशःपश्यतिविलग्नम्॥लग्नेशः कार्य्येशंविलोकयेल्लग्नपं तु कार्य्येशः॥शीतगुर्दृष्टोसत्तां नृ॰१
॥३॥ परिपूर्णाकार्य्यसंसिद्धिः॥कथयंतिपादयोगंपश्यतिसौम्यानलग्नपोलग्नम्॥ लग्नाधिपेचपश्यतिशुभग्रहोनार्द्धयोगोत्र॥एकः शुभग्र
होयदिपश्यतिलग्नाधिपोविलोकयति॥पादोनंयोगमाहुस्तदाबुधाः कार्य्यसंसिद्धौ॥लग्नपतिदर्शनेसतिशुभग्रहोद्वौत्रयोथ
वालग्नम्॥पश्यंतियदितदानीमाहुर्य्योगंत्रिभागोनं॥क्रूरावेक्षणवर्ज्यश्चन्द्रःसौम्यखेचरालग्नं॥लग्नेशादर्शनेसतिपश्यःपू
र्णयोगकराः॥क्रूराक्रांतः क्रूरयुतः क्रूरदृष्टश्चयोग्रहः॥विरश्मितांप्रपन्नश्चसोनिष्टफलदायकः॥समरसिंहे॥अमुकंगदेतिका
र्य्यंकदाभविष्यतिअमुत्रपृच्छायां॥लग्नंलग्नाधिपतिःकार्य्यंकार्य्याधिपःपश्येत॥लग्नतःकार्य्येशःपश्यतिचेल्लग्नपंतदेवभवेत
तत्कार्य्ययद्यन्यःस्थितस्सत्वरंतदानस्यात्॥पश्यतियदाचलग्नंद्रक्ष्यतिविलग्नपंचयदा॥लग्नेकार्य्येचयदाद्वयोश्चयोश्चयोगेतदा
सिद्धिः॥यदिलग्नपंपश्यतिकार्य्याधीशोविलग्नमथतस्य॥कार्य्यस्सहानिरुक्तालग्नमृतेकिमपिनोवाच्यम्॥ ॥इतिसामान्यप्र
तोभावनिरूपणम्॥ ॥अथप्रत्येकंभावप्रश्ननिरूपणम्॥ताजिकशास्त्रोक्तप्रश्नतंत्रे॥भूतंभवद्भविष्यन्मनकिंकथयेत्
तिजातपृच्छायांलग्नपतेःशशिनोवाबलमन्वेष्यंबलाभावे॥दृष्टानवांशकवलंशुभदृग्योगंचसर्वकालेषु॥ प्रष्टुः शुभमादेश

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ष्टं विपरीतं व्यत्ययादेषा॥ लग्नेशो मूसरिफो यस्मात्तस्मान्नीतमा खिपम्॥ येन युतस्तस्माद्भवेदेष्यं यो योऽस्य ते स्तस्मात्॥ यदि लग्ने ल-
ग्नपतिः सौम्ययुतो वा विलोकितः सौम्यैः॥ तत्स्पृष्टुर्व्याकुलता शारीरदोषा विनश्यन्ति॥ पापो यदि लग्नपतिस्तदा कलिव्याधिध-
ननाशः॥ सौम्यैर्निवृत्तिर्वृद्धिर्व्याप्तिः सौख्यमतुलं च॥ अथ द्वितीयस्थानपृच्छा तत्रैव॥ धनलाभस्य प्रश्ने लग्नेशेनेन्दुनाथ धनना-
थः॥ कुरुते यदीत्थशालं शुभयुतिदृष्ट्या भवेल्लाभः॥ क्रूरग्रहे धनस्थे दूरे लाभोऽप्यदप्यशुभं॥ क्रूरमुथशिले धनेशे पृष्टुर्म्रियते यवावि-
लग्नेशे॥ धने धनपेत्थशाले मंदगतिर्यत्र भावानाम्॥ ननु धनसहजादीनां पृष्टुस्तद्वारतो लाभः॥ प्रश्नदीपके॥ लग्नस्थं चंद्रजं चंद्रः क्रू-
रो वाय दि पश्यति॥ धनलाभो भवत्याशु किं त्वनर्थोपि पृष्टुतः॥ चन्द्रलग्नधनाधीशा दृष्टाः युक्ताः परस्परम्॥ धनकेन्द्रत्रिकोणस्थाः स-
द्योलाभकराः स्मृताः॥ शुभदस्त्वामिषड्वर्गो लग्ने सौम्ययुतेक्षिते॥ पृष्टुस्तात्कालिकी लब्धिरलब्धिस्तु विपर्यये॥ चतुर्थे सप्तमे चंद्रे खे-
टे वा लग्नगे शुभे॥ पृष्टुः सद्योऽर्थलाभः स्याल्लग्ने वा सुरमंत्रिणि॥ अथ तृतीयभावपृच्छा॥ प्रश्नतंत्रे॥ सहजपतिर्यदि सहजं पश्यति चेत्त-
द्वयं शुभैर्दृष्टम्॥ तद्भ्रातरो गजरुजः स्वस्थाः क्रूरेक्षरे वामम्॥ यदि सहजपतिः षष्टे तस्मिन्नामुथशिले थ तन्नाशम्॥ षष्टेशो सहजस्थे
सहजपतौ क्रूरितौ वापि॥ सूर्यास्तरश्मिसंस्थे भयावहं पृष्टुरादेश्यम्॥ षष्टद्वस्यपलक्षणम्॥ अष्टस्येपि॥ षष्टाष्टमभावे त्रो पद्भावे ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नी.कं.

॥ ५ ॥

त्रिनेत्यशालिनोस्यानाम्॥पीडांनस्यप्रवदेत्खेटोष्टमसंस्थगेवापि॥एवंसर्वैकथापित्रोस्तुर्येसुतानांच॥भृत्यचतुष्टवर्गस्याएवासेहि
याःसुहृदाये॥अथचतुर्थस्थानपृच्छा॥लग्नपतीन्दुचतुर्थेयदिमुथशिलमथवागृहेगमनम्॥प्रष्टुःपृथ्वीलाभदमसौख्यदम्योगतोनै
व॥यदिपृच्छतिकृषिकोमेक्षेत्राद्धाभोभवेन्नवा॥लग्नंकृषिकस्तुर्येभूमिद्यूनंचकृषिस्तरुर्दशमम्॥लग्नेक्रूरोपगतेसाचोरोपद्रवस्तु
कृषिकर्तुः॥वक्रातिचारवर्ज्येचक्रूरेचौरस्यकृषिलाभः॥लग्नस्येशुभखेटेसाफल्यंकर्षकस्यकृषितःस्यात्॥तुर्येचक्रूरगतेत्यक्ताभूमिंप्र
यात्येषः॥द्यूनेचशुभोपगतेशुभंकृषेस्त्वन्यथातुविपरीतम्॥दशमेदशमपतौवाशुभयुतदृष्टेशुभाद्रक्षाः॥भूभाटकंपृच्छायांलग्नेप्रष्टु
चभाटकंद्यूने॥नसोत्पत्तिर्दशमेतथावसाने चतुर्थेस्यात्॥लग्नस्यलग्नपस्यचशुभयोगेशुभमशोभनेवामेद्यूनेक्रूरोपगतेय
स्मादपिभाटकस्ततोनर्थः॥दशमेक्रूरोपगतेनोत्पत्तिर्बहुतराभवेत्कष्टः॥क्रूरार्दितेतुतुर्येस्यादवसानेशुभंनास्ति॥अथपंचमस्था
नपृच्छा॥यदिपृच्छलेतस्याःस्त्रियोभवेन्मेप्रजानवाकश्चित्॥लग्नेशेंद्वोःसुतपतिनामुथशिलभावेप्रसूतिःस्यात्॥यदिसुतपति
र्विलग्नेलग्नपचंद्रौसुतेथवास्यातां॥सत्वरितमेववाच्यासविलम्बंन   कयोगेन॥द्विशरीरेचविलग्नेशुभयुतनपुंगेह्यप
त्ययोगोस्ति॥यदिलग्नपपुत्रपतिपुंराशौनत्सुतोगर्भे॥अथचंद्रःपुंराशौपुंग्रहहृक्तमुथशिलयुतस्तदापिसुतः॥अथवाविधुरपरा

नृ.२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गर्भे पंचमे

ह्रे सूर्य्यात्पृष्टे तदा स्त्री स्यात्॥ होरास्वामी पुरुषः पुंराशौ चेत्तथापि सुतगर्भः॥ चंद्रयुक्ते क्षितेगर्भे सौम्ययुक्ते क्षितेपि वा॥ उच्चस्थे शुदि
तेन तत्र पुण्यापसंप्रजायते॥ पुण्यापसे आयुष्मदपत्यम्॥ एषा गर्भवती किल नवाप्रमाणं प्रयाति गर्भोयम्॥ प्रश्ने लग्नपशशिनोः सु
तस्थयोर्गर्भवसेव॥ यद्येतनयोर्मुथशिलं केंद्रे सुतपेन गर्भिणीतरपि॥ आपोक्लिमेत्थशालादनीक्षणाल्लग्नपुत्रपोर्नैवम्॥ चरलग्ने
क्रूरेन्थ्वेर्मुथशिलभावे विनश्यति हि गर्भः॥ लग्नपशशिनोः तत्पत्तिस्थवक्रिमुथशिले पि तथा॥ जीवितमरणप्रश्ने वालानां मत्सपे
शुभैर्दृष्टे॥ केंद्रस्थे सितपक्षे शुभयुक्ते स्ये विधौ जीवेत्॥ क्रूरः श्रे दत्सपतिर्दृग्य श्वापोक्लिमेन्वितः क्रूरैः॥ तज्जातमात्र एव म्रियते वालो
थवा गर्भे॥ प्रसवज्ञानप्रश्ने भुक्तांशकान् लग्नांशकान् परित्यज्य॥ भोग्यादि चिंत्यशेषानेनु मितेवं वैदद्दिवसान्॥ यावंतो नवमांशाग
तास्तावंतो गर्भस्य मासागताः॥ यावंतो भोग्यास्तावद्भिरग्रतः प्रसव इति व्याख्या॥ अपरे तु॥ मासज्ञानं शुक्रावस्थानादाहः॥ मास
ज्ञानस्पष्टयां गर्भिण्या भृगुनंदनः॥ लग्नात्स्याद्यावति स्थाने मासा नाख्याति तावतः॥ सुतासंख्यां तदावाच्यायदाधर्मासरंग
तइति॥ भुवनप्रदीपकोक्तेः॥ लग्नात् तद्दिनराशिर्द्विवाग्रहो लग्नपश्च दिनराशेः॥ तद्दिवसे जन्मवाच्यं विपरीते व्यस्तपश्चेषाम्॥ अथरा
त्रिलग्नमह्नि तदाधिपतिश्चेत्तस्य राशिपतेः॥ वलमूर्ध्वं दिनेहोरापुंराशिः स्त्रीग्रहाप्येवम्॥ अस्मिन्वर्षेऽपत्यं भविता विलग्ने पंचमाधीशे॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भजतोयदीत्थशालं तत्रैवाब्देभवतिनूनम्॥यद्विवामिथोग्रहगतौ स्यातामैनौच संततिस्तदापि॥बाव्यास्तस्मिन्वर्षेशुभयोगादन्य॥
थानपुनः॥सुताप्रसूतयुवतिर्ज्ञानेसुतपोथषष्ठपःसूर्यात्॥निर्गत्येद्दयमायात्ततःप्रसूतेवनारीयम्॥अथजीवेसौम्यशुक्राआका
रोउदयिनस्तयाप्येवम्॥अथषष्ठस्थानप्रश्नः॥ ॥रोगोदयमुत्थासतिनवेतिलग्नेभिषक्चूनम्॥व्याधिर्दशमंरोगोहिबुकंभेष
जमिहाहुराचार्याः॥१॥क्रूरार्दितेविलग्नेवैद्यान्नगुणस्तुदोषधात्रोगः॥वृद्धिमुपयातिदशमेक्रूरैर्निजबुद्धितोप्यगुणः॥२॥अस्ते
चक्रूरयुतेमांद्यान्नांद्यंतथौषधाद्दो॥सौम्योपगतेरितैररोगतारोगिणोभवति॥३॥लग्नेशेन्द्वासौम्येत्थशालेतोरोगनाशनंवा
च्यम्॥वक्रेकेतुतत्रखेटेभूयोपिगदःसमुपयाति॥४॥भूमिस्थलग्नाथद्यूनस्वशशीमुथशिलेभवेन्मृत्युः॥लग्नस्थेरंध्रपतौलग्न
लग्नाधिपतिस्ते ये चंद्रः स... शो
पशशिनोर्विनाशोवा॥५॥लग्नाधिपसूर्येचंद्रःसमेशमुथशिलविधायी॥सत्रेशाषष्ठस्यतन्मरणंरोगिणोवाच्यम्॥६॥रंध्रेशेनविन
ष्टेनाप्तमितेनापिकेंद्रस्थे॥लग्नेशास्यमुथशिलेमृत्युःस्याद्रोगपृच्छायाम्॥७॥अथवानयोश्चकेंद्रेमुथशिलतःक्रूरपीडितेमरणम्॥य
दिकेन्द्रेक्रूरग्रहस्तदापीडा॥अष्टमेशलग्नेशौचमुथशिलिनौनदामृत्युःस्यादितिवाच्यमित्यर्थः॥सूर्य्यद्वादशभागंप्रविष्टेलग्नेश्वरेप्ये
वम्॥८॥लग्नेचरेस्वरोगीक्षणेक्षणेस्याद्रुकसरुक्कापि॥द्विशरीरेपररोगःस्थिरेगदःस्यैवरोगत्वम्॥९॥शशिनोवक्रमुथशिलेस्थिररो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

[illegible]

गोमंदस्तुथशिलेपूर्वमत्रनिरोधाद्भोगोसम्पत्तिर्ज्ञेयाकृतप्रश्ने॥१०॥अथपृच्छायाः पूर्वसप्ताहानिचविलोक्यचत्वारि॥यदितेषुशुभाग्रांकस्त्रीशु
भयुतदृष्टेतदाशस्तम्॥११॥अथमंदोयमथनवेतिप्रश्नेलग्नेश्वरेथचंद्रेवा॥षष्ठेशमुथशिलः स्यात्तदस्तमितोवातदामंदः॥१२॥रोगवा
नित्यर्थः॥अथस्वामिभृत्यचतुःपादप्रकरणम्॥ ॥इन्द्रोन्योममभवितानवेतिलग्नेश्वरस्ययदिकेन्द्रो॥नोभवतिमुथशिलंषष्ठांसपति(
भ्यांनदानान्यः॥१॥वैक्रीवान्येनसमंलग्नपतिःसहजनवमसंस्थेन॥कुरुतेयदीत्थशालंतदान्यनाथोभवेत्प्रभुः॥२॥लग्नपतौकेन्द्र(
स्थेरिपुदृष्ट्याक्रूरवीक्षितेपुण्ये[मुथप]॥रविरश्मिगतेथभवेद्यावज्जीवेचनान्यपतिः॥३॥अथमीशोभद्रोमेपृच्छायांलग्नपस्यमर्कबूले॥स्वा
मीशएवभव्योद्यूनेशस्यचशुभोन्येशः॥४॥ग्रहभूमिस्थानानांः[अधिकारः]चलनप्रश्नेपुरोक्तएवविधिः॥सम्यक्विचार्यवाच्यंशुभमशुभंपृच्छतः(
स्वधिया॥५॥भृत्यचतुष्पदलाभप्रश्नेलग्नेशाशीतगूषष्ठे॥षष्ठेशमुथशिलोवालग्नेषष्ठेश्वरेथतल्लाभः॥६॥भृत्यस्यवाहनस्यचय
द्वाप्रश्नेचलग्नलग्नपती॥अर्थीदातासप्तमसप्तमपोतद्वलात्सांप्तिः॥७॥लग्नस्यसप्तमेशेनमुथशिलेसप्तमस्यवालग्नेशेनमुथशि
लेलग्नेशासप्तमेशयोर्वापरस्परंमुथशिलेभृत्यादिकस्यपृच्छकाभिलाषविषयस्यलाभइत्यर्थः॥अथसप्तमस्थानपृच्छा॥ ॥स्त्रीला
भस्यप्रश्नेस्वराधिपेलग्नपेनशशिनावा॥कृतमुथशिलेयुवत्याअयाचितायाभवेल्लाभः॥१॥यदिलग्नपोविधुर्वाद्यूनेतदयाचितं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नी॰ नी॰कं॰ स्त्रियंलभते॥लग्नेन्द्वाल्मूसरिफे चंद्रेस्तपमुथशिले स्वयंलाभः॥२॥येनसमंमुथशिलं नैत्रविनष्टेचपापयुतदृष्टे॥निकटीभूयतदाकिल पृ॰२

॥५॥६॥ विनश्यतिह्योगतंकार्यम्॥३॥पापेभ्रं रंध्रनाथे स्त्रीजातेरेवविघटतेकार्य्यम्॥सहजपतौ भ्रातृभ्यस्तूर्य्येशे पितृतनोन्येभ्यः॥४॥सौम्य

कृतयुक्तिदृग्भ्यांपूर्वोक्तस्थानतः शुभंवाच्यम्॥ ॥अथस्त्रीस्नेहः॥ ॥प्रीतिस्थानप्रश्नेस्मरपतिलग्नेशमुथशिलेस्नेहः॥स

कटकदृशासकटकः शशिमकंबूलेतुसापिशुभा॥१॥यदिमंदौस्याग्रेशः केन्द्रेचस्यात्तदाबलीप्रष्टा॥अस्तेम्बरेचमंदेकेन्द्रेप्रनिः

वादिनोस्तिबलम्॥२॥उभयोरेकस्थितयोर्द्रष्टव्या सकटकेतयोः प्रीतिः सूर्य्येनशुभंविबलेनरस्य शुक्रे स्त्रियोर्द्वयोर्द्वितये॥३

अथरुष्टागमनम्॥ममगृहिणीरुष्टापुनरेष्यतिनाथभूम्यधस्थरवौ॥भूपरिगतेचशुक्रेनैतिपुनर्वक्रितेभ्येति॥४॥सूर्य्यान्निर्गत

शुक्रेवक्रेपिसमेतिचान्यथारुष्टा॥क्षीणेन्दौबहुदिवसैः पूर्ण्णविधौचद्रुतमुपैति॥५॥भूमिशब्देनचतुर्थस्थाने॥तस्मादधः पूर्वल

ग्नपर्यंतमितियावत्॥लग्नमारभ्यचतुर्थपर्य्यंतंहिस्त्रीणांहर्षस्थानंनपुंसांरविश्चपुरुषग्रहस्तेनरुष्टायानागमनंएवंभुवश्चतुर्थादु

परिसप्तमपर्य्यंतंनराणांहर्षस्थानम्।नस्त्रीणांशुक्रस्यस्त्रीग्रहत्वान्नहर्षस्थानंइतिनरुष्टाआगमनंइत्याशयः॥ अथकन्यापरीक्षा एषा

कुमारिकाकिलनिर्दोषाकिंन्तुमेनिरप्रच्छायाम्॥लग्नेस्थिरेस्थिरर्क्षेलग्नपशशिनोश्चनिर्दोषा॥१॥चरराशिगतेरैतौर्य्येकुमार्य्यपिच॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ज्ञातदोषा स्यात्॥ द्विशरीरस्थे चंद्रे चरलग्ने स्वल्पदोषा स्यात्॥ २॥ शशिभौमावेकर्क्षे स्थिरखेऽजे तत्परेण गुप्तमियम्॥ रमिताशनिचंद्र
मसोर्ह्लेग्नगयोः व्यकटमुपभुक्ता॥ ३॥ यदि भौमशनी केंद्रे विधुदृष्टे त्वश्विकेऽथ शुक्रः स्यात्॥ तद्द्रेष्काणेऽथ तदा निर्भर्ति जातदोषैषा ४
अथ स्वपरप्रसूतिपरीक्षा॥ एषा किल प्रसूता सितेऽघटे ह्येहेरे च नो सूता॥ अनयोरलिवृषगतयोः सूतानारीपरिज्ञेया॥ १॥ सिंहस्थे बु
धे शुक्रस्यार्कभगतत्वमसंभावितेनयोगद्वयमेतद्वैकल्पिकम्॥ एवं वृषपदृश्चिकगतत्वं व्याख्येयम्॥ भौमबुधशुक्रचंद्रा द्विशरीरेस्वा
पवर्जिते चेत्सुः॥ अग्रे स्थितलग्नसस्तिश्चापेनाग्रेण पृष्ठतः सूता॥ २॥ क्रूरस्थे चरराशौ परतः सूता स्थिरे तु निजपत्युः॥ मिश्रे तु मिश्रमूह्यं
ज्ञातकसंदेहपरिच्छायाम्॥ ३॥ पंचमेशलग्नेशयोरन्यतः क्रूरस्ताभ्यां सहजमुथशिलो वा क्रूरस्तनइदं फलमादेश्यं नदेवाग्रेऽभिव्यनक्ति॥ गुर्वि
णयेषा स्वपत्युः परपुरुषाद्वेति लग्नसुतपत्योः शुभयुतिदृग्भ्यां स्वपतेः शनिभौमदृशाऽन्यतो गुर्वी॥ ४॥ अथ पातिव्रत्यपरीक्षा॥ कुलटास
तीयमथवेति लग्नपतिश्चंद्रमाश्च भौमेन॥ एकांशे मुथशिलकृत्तं दैवभवने भजत्यन्यम्॥ १॥ यदि गृहनिजगो भौमस्तद्दो न्यदेशं प्रयाति जार
क्तेः॥ रविणेति मुथशिले सत्युपभुक्ता राजपुरुषेण॥ २॥ सौम्येन लेखकवणिक निजभेन शुक्रेण योषयैव स्त्री॥ एतेष्योगैरसतो विप
रीते सुचरितेति विज्ञेयम्॥ ३॥ लग्नपतिनाथशशिनामूसरिफे भूसुते भवेत् जारः॥ सक्तः पुनर्गुरुदृशा पुत्रभयाद् विट्दृशा च राजभयात्॥ ४॥

अलंकारेकौतुहलेजातकदीपकं [illegible]

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नी॰कं॰ ॥७॥

ए कर्क्षदृष्ट्या

सितदृष्ट्यापरनारीभयात्सितङ्गैकराशिगतदृष्ट्या॥जारस्यस्थविरत्वाल्लज्जितत्वात्पनतिजारंस॥५॥ अथाष्टमस्थानपृच्छा॥ ॥नृपसंग्राम
प्रश्ने विलग्नलग्नेशसंस्थितात्खेटात्॥शशिमूसरिफात्त्वष्टात्तास्तपसंस्थेन्दुमुथशिलात्कुत्रु॥१॥तेषांचबलात्तयोर्बलमित्यर्थः॥अथ
वाशनिकुजजीवाःशीघ्रेभ्योवलयुताउपरिचराः॥बुधसितचन्द्रास्तेभ्यश्चदुर्बलाधश्चराश्चसेविंत्याः॥२॥मंदात्त्वष्टुग्रहाःशन्या
दयोयदिशीघ्रेभ्यःसितादिभ्योऽग्रेसराभवंतितदासितादिभ्यःशत्रुगेहेभ्यस्तेजोलब्ध्वाजयभाजोभवंतिप्रष्टारः॥यदातुमेकालेशा
न्यादयोनाग्रेसरास्तदाशीघ्रेभ्यस्तेजोलब्धुमशक्ताःपराभूताभवंतीत्यर्थनःसिद्धम्॥लग्नपतावस्तपतेःषट्त्र्यंशदृशाथमुथशिले
वैको वा दृष्टा
दृयोःस्नेहः॥वर्गद्वयमध्याधःपतितःसोन्येनवध्यैःस्यात्॥३॥वर्गद्वयाधिपानांमूसरिफेस्तंगतेनरैर्णैर्दध्यै॥लग्नस्वामिनिगेमंदेमक
बूलेउपरिगेजयःप्रष्टुः॥४॥एवंगुणेतस्मिन्विप्रविनष्टेस्तपतितनीचस्थे॥केन्द्रेस्तेवास्तपतौप्रष्टुर्हानिःप्रवक्तव्या॥५॥लग्नादध
शुभेसतिउपरिस्थेमंदेशुभःसहायःस्यात्॥लग्नपतौरंध्रस्थेरंध्रपमुथशिलगेमतिःप्रष्टुः॥सप्तेशेधनसंस्थेधनेशकृतमुथशिलेरिपो
र्नाशः॥लग्नेशादशमपस्योर्मुथशिलतःप्रष्टुःकस्यजयवीर्यं॥६॥तूर्यास्तमेवापस्योरेवंशत्रोर्योगेजयोज्ञेयः॥उभयवर्गेपिकेन्द्रेतस्पतिहक
तमुथशिलेवलंज्ञेयम्॥७॥वलवान्मुथशिल्यत्रवर्गेगतस्यवर्गस्यजयइत्यर्थः॥ चरराशौसवलस्वेजित्वाप्रांतेविनाशस्तु॥लग्नपता
चंद्रेणमुथशिलेविशविंष्टस्सर्समंडलप्रविष्टःस्तंगतेपतितनीचस्थेनदाप्रष्टुर्नाशः॥इतिपूर्वेणान्वयः
लग्नादधःनामलग्नात्सप्तभागदृश

नृ॰३

वंसस्थेप्रष्टानमप्यतिपरोस्तेपष्टे॥८॥खपतौलग्नेमुथशिल्येशेः सेरिपोः सहायवलम्॥यन्मुथशिलोरवीन्दूतस्यवलंमूससरिफ
तोहानिः॥९॥अथनवमस्थानप्रश्नः॥ ॥ममगमनंभविताकिंनवेतिलग्नेशःखेरेवाकेन्द्रे॥नवमेशमुथशिलेसतिनवमेशोवाभवेद्ग
मनम्॥१॥लग्नस्थेनवमपतौलग्नाधिपमुथशिलेचसंचारात्॥रहितेयातिपुनर्नैनवमदृशावर्जितेयोगे॥२॥लग्नपतौकेन्द्रस्थेसहृ
जग्रहमुथशिलेचनिक्रूरे॥गमनंस्यादस्मिन्वाकेन्द्रेक्रूरेचनास्तिगतिः॥३॥अस्तेक्रूरेचपरैकार्यनिर्यातिविघ्नमतएवआकाशस्थेपा
पेरानकुलाज्यपेष्टतोनिजाद्वापि॥४॥नवमेशोमुथशिलगेलग्नाधीशेनपापरिपुदृष्टे॥गमनेवसानतःस्यात्कष्टंकष्टंस्वयोर्थस
॥५॥लग्नेशेनवमेशेमुथशिलकृतिरंध्रसप्तमेकष्टम्॥उदयेस्मिन्पापाद्विनिःसृतिःस्यात्सुखाकरःपंथाः॥६॥लग्नान्मार्गानुभ
वोव्योम्नःकार्यस्यसाद्गतिस्थानम्॥भूमेःकार्यपरिणतिरेवंलग्नेशशरीरसुखम्॥७॥दशमेशुभेचसिद्धिःकार्यस्यास्तेप्रयातिय
स्थाने॥तत्रशुभंचचतुर्थेपरिणामःसुंदरःकार्ये॥८॥लग्नेशशिनंवायःक्रूरस्तुदतितत्रमनुजर्क्षे॥मनुजस्त्रिराशिकेवान
दाभयंद्विपदतोगंतुः॥जलराशौवारिभयंचतुष्पदर्क्षेतथाश्वादेः॥घटचापेद्रुमकंटकभयंहरौव्याघ्रसिंहादेः॥१०॥नगरप्रवेशतो
स्मान्फलमस्तिनवाप्रवेशलग्नमिह॥तस्मिन्धनेपवक्रेणोरहणंकार्यसिद्धिर्वा॥११॥रहणंस्थितिरित्यर्थः॥अतिचरितेवहुदिवसंरहणं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नी॰ कं॰ नोकार्यसिद्धिरीषदपि॥ नवमतृतीयगेस्मिन्कार्य्यंकृत्वाशु निजपुरंयाति॥१२॥ लग्नेकर्म्मणयाये धनपयुतेशोभनेद्दृयम्॥ सकू नृ॰ २
॥८॥ रसद्मस्थेपथिविघ्नान्भ्रकटकश्चतुर्थस्थे॥१३॥ अथदशमस्थानप्रश्नः॥ ॥राज्याप्तिप्रश्नेलग्नेशेशशिनिवानभःपतिना॥ कृत
मुथशिलेम्वरदृशाराज्यंरूपक्रमाद्भवति॥१॥ स्वकुलोचितंराज्यंभवतीत्यर्थः॥ अन्योन्यभवनगमनात्क्रूराभावेथचिंतितप्राप्तिः॥
लग्नस्थेनान्येनचसौम्येनाम्बरस्यमुथशिलेप्येवम्॥२॥ पापार्दितेतुमंदेनिकटीभूयोतरस्यधोराज्यं॥ मंदगा मीयोग्रहोत्राधिकारी॰
तस्मिन्यापयुतेराज्यनाशइतितात्पर्यं॥ भूमिस्थेक्रूरदृशात्वपवादःशुभदृशाकीर्तिः॥३॥ मंदग्रहेबलवतिक्रूरवियुक्तेयदाश
शीविबलः॥ मंदेबलेनभ्रमणात्राज्यप्राप्तिर्भवेत्स्फुटं॥४॥ लग्नाधिपतौस्वगृहेलाभोराज्यस्यतुंगगेभौमे॥ लग्नांबराधिपौयदिम॰
कर्बूलौकेंद्रगेदुमुथशिलतः॥५॥ उत्तमराज्यावाप्तिःस्वर्क्षेस्थेचन्द्रतोविपुला॥ यत्रर्क्षेलग्नेशस्तस्तनिरशुभेगृहेतदाकार्यम्॥६॥ नस्याद
स्तेकष्टादृशमदृशाकष्टकर्त्ताकोर्ये॥ राज्यप्राप्तौसत्यांयदिपृच्छतिकोपिपरिणतिंचतदा॥७॥ लग्नंशरीरकार्यंगृहकर्म्मास्तनभश्चराज्यार्थे
॥लाभोमित्रस्यार्थेचतुर्थकंकर्मणोवसितयेच॥८॥ द्रव्यंधनायसहजंभृत्येभ्योरिपुश्चवैरिभ्यः॥ एतेःशुभैःशुभंस्यादशुभैवामंचसर्वकार्ये॥
णाम्॥९॥ वित्तस्वामिनिभौमेनोचिस्सेपारदारिकेव्ययकृत्॥ जीवेधर्मायरिपौगुरुपूजायैसितेविलासाय॥१०॥ वाणिज्यायज्ञेपुनरिंदौ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

लग्नाधीशेनमुथशिलाभावेअन्यार्थंवाणिज्यंकरोति
मुथशिलिनिचान्यथान्यार्थम्॥लग्नपतौपतितस्थेविवलेराज्यास्यस्तुमकवूले॥११॥कोपिगुणस्यात्पापाक्रांतेरशुभंराज्यच्युतोर्भवति॥
नरपतिशशिवस्नेहप्रश्नेमकवूलेलग्नसप्तपयोः॥१२॥मुथशिलयोःशुभदृष्ट्याशुभताराज्येमिथःस्नेहः॥राज्यंचरंस्थिरंवालग्नेपगगनेश
योःसहमुथशिलयोः॥१३॥यद्येकोमंदस्यात्केन्द्रेतस्थिरमतोन्यथावाच्यम्॥यदिवासवाममार्गेभूमौवाप्रच्युतिर्भवेत्पूर्वम्॥१४॥मक
पार समद ग्रहःवामः वेत्रि
वूलेसतिलभतेशीघ्रंमूसरिफेतोनपुनः॥ ॥अथैकादशस्यानप्रश्नः॥ ॥नृपतेर्गौरवलाभाशादिमस्यान्नवेतिचप्रश्ने॥आ
येशलग्नेपत्योःस्नेहदृशामुथशिलेद्रुतंभवति॥१॥रिपुदृष्ट्यावहुदिवसैःकेन्द्रेचायेशचंद्रकंवूले॥वाच्यापूर्णैवाशाचरस्थिरद्वि
स्वभावगेस्वनामफलं॥२॥मंदेक्रूरेपहृतेभूत्वाशाशुभप्रणाशमुपयाति॥क्रूरायुक्तेशुभयुज्यधिकारवशेनलभ्याशा॥३॥मित्रे
णसहप्रीतिर्भवितालग्नेश्वरस्यपत्योश्च॥प्रियदृष्ट्यामुथशिलनःप्रीतिर्वान्योन्यगृहयानात्॥४॥केन्द्रस्थितयोरनयोर्मैत्रीकि
गुरुः
लपूर्वजातैव॥पणफरगंतोयुवंःस्याद्यापोक्लिमंतोमहाप्रीतिः॥५॥गुप्तंकार्यमिदंमेसिध्यतिलग्नेश्वरेथचंद्रमसि॥शुभमुथशिल
गेकेन्द्रेतन्निकटेपाथसिद्धिःस्यात्॥६॥ ॥अथद्वादशस्यानप्रश्नः॥ ॥रिपुविग्रहप्रश्नायांवलवतिषष्ठेरिपुःसबलः॥द्वादशेपेशु
शुभे
भदृष्टेवलवतिवाच्यंवैरंग्रहः॥१॥रिपुविग्रहप्रश्नायांनामोच्चारेरिपोर्वलिन्यस्ते॥गुप्तेचद्वादशेपेवलवतिवाच्यंबलंग्रहः॥२॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नी॰कं॰ ॥९॥

नर्थात्
शुभयुतदृष्टसद्मयमशुभेक्षणयोगतोन्ययमनयास्तत्॥एवंभावेष्वखिलेषूह्यंसदसत्फलंसुधिया॥३॥ ॥इतिसंक्षेपतोद्वादशभाव नृ०२
प्रश्ननिरूपणम्॥ ॥अथकेचिद्विशेषतःप्रश्नाः॥ ॥तत्रादौपथिकागमनम्॥ताजिकेसमरसिंहे॥ ॥आगमनेपृच्छायांलग्नेशो
लग्नमध्यसंस्थेन॥कृतमुथशिलेसमेतिहिसुखमस्ततुरीयगेकष्टात्॥१॥स्थानाच्चलितप्रश्नेलग्नपतौसहजनवमगृहसंस्थे॥लग्न
लग्नपतौ
स्थेनमुथशिलेपन्थानंवहतिपथिकोयम्॥२॥रंध्रेथधनेतस्मिन्नाकाशसंस्थेनमुथशिलेप्येवं॥केन्द्रस्थितेत्थशालेलग्नेक्षणवा
न्प्येमेतिनकदापि॥३॥लग्नाधिपतौवक्रेलग्नंपश्यसमुत्तचंद्रेवा॥वक्रगमुथशिलेसन्निसमेतिपथिकःसुखंशीघ्रं॥४॥अंतस्थि
तलग्नपतौशशिनाकृतमुथशिलेद्रुतमुपैति॥लग्नाद्वापिचतुर्थाच्छुभाद्वितीयतृतीयगावपि॥५॥कथयंतिनष्टलाभंप्रवासिनश्चा(
शुभैः
गमंत्वरितम्॥चिंतामणौ॥अग्रहैःषष्ठेथजामित्रेवाक्पतिःकंटकेस्थितः॥पथिकागमनंब्रूतेसितेनेज्ञेवात्रिकोणगे॥६॥षष्ठेष्टमेपापदृष्टे
शुभदृग्वर्जितेबुधः॥लग्नात्सप्तमेयदापापायातुश्चनिधनंवदेत्॥७॥यदाक्रूरास्तृतीयस्थाःदशमाद्द्वादशांतरंगतः॥चौरेरपेवहतस्वश्चपा
पापाः
थिकःकेन्द्रगायदि॥८॥पापैःषष्ठत्रिलाभस्थैःकंटकस्थैःशुभग्रहैः॥प्रवासीसुखमायातिदूरस्थोपिसुनिश्चितम्॥९॥चतुरस्त्रेत्रिको
णेवापापगेहस्थितःशनिः॥पापदृष्टश्चनियतंवधनंयातुशादिशेत्॥१०॥शुभयुक्तेस्थिरेलग्नेस्थिरेएवंधश्चरेन्यथा॥द्वितनौसौम्यसं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

युक्ते वंधमोक्षौ क्रमेणतु ॥११॥ पापाः त्रिकोणजामित्रे विलग्नेष्टष्टकोदये॥ शत्रुभिर्विक्ष्यमाणाश्चयातुः कष्टं वदेत्सुधीः ॥१२॥ मार्ग
स्थानगतेः सौम्यैः मार्गतस्य शुभं वदेत् ॥ क्रूरैर्दुःखं विलग्नस्थैः पापैः क्लेशमवाप्नुयात् ॥१३॥ चरलग्ने चरांशेवा चतुर्थे चंद्रमास्थितः।
प्रवासी सुखमायाति कृत कार्य्यश्च तेतमनि ॥१४॥ कंटके : सौम्यसंयुक्तेः पापग्रहविवर्जितेः ॥ प्रवासी सुखमायाति निधनं सुसुधाक
गंदस्थानहितौ यदा दश गोदरधरा सङ्घोज्ञे तेः
रे ॥१५॥ गमागमौ तु नस्यातां योगे दुरुधरा कृते ॥ शुभैः शुभकृतौ राधः पापैस्तस्करतो भयम् ॥१६॥ गमागमौ हि नस्यातां स्थिरराशौ
विलग्नगे ॥ नरोगोपशमो नाशो द्रव्याणां न पराभवः ॥१७॥ विपरीतं चरे वाच्यं फलं मिश्रं द्विमूर्तिषु ॥ स्थिरवत्प्रथमे खंडे परार्द्धे चररा
शिवत् ॥१८॥ प्रवासीशीघ्रमायाति गुरुः शुक्रौ त्रिवित्तगौ ॥ चतुर्थस्थानगावेतौ शीघ्रमायाति कार्य्यकृत् ॥१९॥ इन्दुः सप्तमगो लग्नात् पं
थिकं वक्ति मार्गगम् ॥ मार्गाधिपश्च राश्यर्द्धात्परभागे व्यवस्थितः ॥२०॥ शुक्रार्कजीवसौम्यानामेकोपि स्याद्द्रायगः ॥ तदा शुगमनं ब्रूया
त्सुहृद्गमनं व्यये ॥२१॥ लग्नाद्यावत्तिथे स्थाने वली खेटो व्यवस्थितः ॥ ब्रूयात्तावत्तिथे मासे पथिकस्य निवर्त्तनम् ॥२२॥ एवं कालं च
रांशस्थे द्विगुणं च स्थिरांशके ॥ द्विस्वभावांशगे खेटे त्रिगुणं चिंतयेत्सुधीः ॥२३॥ यातुर्विलग्नाज्जामित्रभवनाधिपतिर्य्यदा ॥ करोति वक्र
मात्तेः कालं तु अववेनपरे ॥२४॥ चतुर्थे दशमे वापि यदि सौम्यग्रहो भवेत् ॥ तदा न गमनं क्रूरैः तत्रस्थैर्गमनं भवेत् ॥२५॥ लग्नाद्वा लग्न

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

शी॰ क॰ नाथाद्वायसंख्याक्रूरखेचराः॥नवमेद्वादशेवापितत्संख्यास्युरुपद्रवाः॥२६॥लग्नाद्वालग्ननाथाद्वायावंतःसौम्यखेचराः॥भोगे

॥२०॥ तत्रोदयावाच्यःस्थानेस्थानेविचक्षणैः॥२७॥क्रूरयुक्तेक्षितेनोमंदःशुभदृग्योगवर्जितः॥धर्मस्यस्तनुतेव्याधिंप्रोषितस्याष्टगोमृति नृ॰ ३

मौ

म॥२८॥जामित्रस्थःशुभोस्थेयातानायातिदुरुधरयोगे॥मित्रस्वामिनिषेधा(स्था)गेपोत्थेशत्रुरुक्चोरान्॥२९॥चंद्रार्कयोःश्छिद्रगया

र्थमेननमंदः दृष्टयोस्त्यापथिशास्त्रभीतिः॥चंडोसितेड्येचसुखास्तिगोरमंदेभयंपापयुग्मीक्षितेध्वनिः॥३०॥अथदूरस्थोजीवतिमृतोथवेत्यंच

